# Government General Degree College at Ranibandh

## Rautora, Ranibandh, Bankura - 722135

## Sanskrit Department

## Study Material for GE

## 1st Year 2nd Semester

## Paper – Poetry And Chanda (GE-2)

## Unit 1 – Raghuvamsam (Canto - 1)

**१) वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।**

**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।१।।**

**प्रसङ्गनिर्देशः** - महाकविकालिदासविरचितस्य रघुवंशमहाकाव्यस्य प्रथमसर्गे विद्यते अयं श्लोकः। अस्मिन् श्लोके पार्वतीपरमेश्वरयोः वन्दना विधीयते।

**सान्वयार्थाः** - वागर्थाविव शब्दार्थाविव सम्पृक्तौ सम्पर्कयुक्तौ जगतः विश्वस्य पितरौ मातापितरौ पार्वतीपरमेश्वरौ उमामहेश्वरौ वागर्थप्रतिपत्तये शब्दार्थपरिज्ञानाय वन्दे नमस्करोमि।

**व्याख्यानम्** - अयं रघुवंशस्य मङ्गलश्लोकः वर्तते। अत्र महाकविः कालिदासः रघुवंशमहाकाव्यस्य निर्विघ्नपरिसमाप्तये पार्वतीपरमेश्वरयोः स्तुत्या मङ्गलं विदधाति।

अत्र वन्द्यमानौ देवौ पार्वतीपरमेश्वरौ समस्तस्य लोकस्य मातापितरौ। अतः समग्रं विश्वमेव तयोः पुत्रसमानं भवति। यथा मातुः पितुः च प्रसादः सदा सन्तानेषु वर्तते तथा एव उमामहेश्वरयोः प्रसादः अपि कवौ अस्ति। पार्वतीपरमेश्वरौ वागर्थौ इव सम्पृक्तौ। यथा शब्दार्थयोः सम्बन्धः यथा नित्यः अस्ति तथा उमामहेश्वरयोः दाम्पत्यबन्धः अपि नित्यः अस्ति। तादृशयोः सम्पर्कयुक्तयोः उमामहेश्वरयोः वन्दनायाः फलं वर्तते शब्दार्थयोः सुस्पष्टं ज्ञानम् इति। शब्दार्थौ उत्कृष्टौ चेत् काव्यमपि उत्कृष्टं भवति। काव्यस्य उत्कृष्टता एव कवेः साफल्यम्। अतः कविः पार्वतीपरमेश्वरयोः स्तुत्या रघुवंशकाव्यस्य साफल्यमेव प्रार्थयति। अतः कवेः प्रार्थना समुचिता अस्ति।

अत्र श्लोके उपमालङ्कारः वर्तते। प्रस्तुते श्लोके उपमेयः भवति पार्वतीपरमेश्वरौ। उपमानं भवति वागर्थौ। अपि च उपमावाचकः शब्दः भवति इव इति। यथा वागर्थौ संयुक्तौ भवतः तथा पार्वतीपरमेश्वरौ अपि संयुक्तौ इति सादृश्यम्।

**२) मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम्।**

**प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः।।३।।**

**प्रसङ्गनिर्देशः** - महाकविकालिदासविरचितस्य रघुवंशमहाकाव्यस्य प्रथमसर्गे विद्यते अयं श्लोकः। अस्मिन् श्लोके कविः विनयेन स्वस्य अधमतां प्रदर्शयति।

**सान्वयार्थाः** - मन्दः मूढः कवियशःप्रार्थी कविकीर्त्यभिलाषी प्रांशुलभ्ये उन्नतेन प्राप्ये फले फलविषये लोभात् मोहात् उद्बाहुः उन्नतभुजः वामनः इव खर्व इव उपहास्यतां गमिष्यामि उपहास्यो भविष्यामि।

**व्याख्यानम्** - महाकविः कालिदासः पूर्वस्मिन् श्लोके स्वस्य असामर्थ्यं प्रकटितवान्। किन्तु तेन तस्य तृप्तिः न जाता। अतः अस्मिन् श्लोके पुनः स्वीयम् असामर्थ्यं प्रकाश्य विनयं प्रकटयति। उपरि स्थितं यत् किमपि वस्तु उन्नतः जनः एव प्राप्तुं शक्नोति। कश्चन वामनः तत् फलं प्राप्तुम् इच्छति चेत् तेन स्वस्य बाहुद्वयम् उन्नतं कृत्वा तत् प्राप्तव्यं भवति। किन्तु एवं कुर्वाणः स सर्वैः उपहसितः भवति। कालिदासः अपि महाकविकीर्तिं प्राप्तुं काङ्क्षते। किन्तु सा कीर्तिः सामान्यमानवैः प्राप्तुं न शक्यते। विशिष्टैः प्राज्ञैः एव सा प्राप्यते। तथापि कालिदासः लोभात् तां प्राप्तुं प्रयतते। अतः स सर्वैः उपहसित एव भविष्यति इति तस्य मतम्। एवं कालिदासः विनयं प्रदर्शयति।

अत्र श्लोके उपमालङ्कारः। वामनः इति पदम् उपमानम्, मन्दः इति पदम् उपमेयम्। एवमेव कवियशः उपमेयं प्रांशुलभ्यं फलं चोपमानम्।

**३) वैवस्वतो मनुर्नाम माननीयो मनीषिणाम्।**

**आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव।।११।।**

**प्रसङ्गनिर्देशः** - महाकविकालिदासविरचितस्य रघुवंशमहाकाव्यस्य प्रथमसर्गे विद्यते अयं श्लोकः। अस्मिन् श्लोके कविः रघुवंशस्य आदिमं पुरुषं मनुं वर्णयति।

**सान्वयार्थाः** - मनीषिणां विदुषां माननीयः पूजनीयः छन्दसां वेदानां प्रणव इव ओङ्कार इव महीक्षितां राज्ञाम् आद्यः प्रथमः वैवस्वतो नाम वैवस्वत इति नाम्ना प्रसिद्धः मनुः प्रजापतिः आसीत् अभवत्।

**व्याख्यानम् -** अत्र कविः रघुवंशस्य वर्णनप्रसङ्गे सूर्यवंशस्य उत्पत्तिं वर्णयति। पुराणानुसारेण स्वयम्भुवादयः चतुर्दश मनवः आसन्। तेषु सूर्यपुत्रः वैवस्वतः मनुः सप्तमः वर्तते। तस्मात् एव सूर्यवंशस्य उत्पत्तिः सञ्जाता। श्लोके अस्मिन् तस्य एव पूजनीयतां वर्णयति कविः। वैवस्वतमनुः तथा पूजनीयः आसीत् यत् दिव्यदृष्टिसम्पन्नाः मनीषिणः अपि तं श्रद्दधति स्म। अपि च, स पृथिव्याः सर्वेषां राज्ञां मध्ये प्रथमः अपि आसीत्। स हि छन्दसां प्रणवः इव। यथा ओङ्कारः वेदमन्त्रेषु आदिमः पूजनीयश्च अस्ति तथैव वैवस्वतमनुः अपि महीपतिषु प्रथमः पूजनीयश्च आसीत्।

अस्मिन् श्लोके उपमालङ्कारः विद्यते। अत्र क्रमशः महीक्षिताम्, वैवस्वतः इति पदद्वयम् उपमेयवाचकम्। छन्दसाम्, प्रणवः इति क्रमशः पदद्वयम् उपमानवाचकम्। इव इति सादृश्यवाचकः शब्दः।

**४) अथवा कृतवाग्द्वारे वंशेस्मिन् पूर्वसूरिभिः।**

**मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः।।४।।**

**प्रसङ्गनिर्देशः** - महाकविकालिदासविरचितस्य रघुवंशमहाकाव्यस्य प्रथमसर्गे विद्यते अयं श्लोकः। अस्मिन् श्लोके कविः रघुवंशस्य माहात्म्यं वर्णयति।

**सान्वयार्थाः** - अथवा अन्यस्मिन् पक्षे पूर्वसूरिभिः प्राचीनकविभिः कृतवाग्द्वारे कृतकाव्यप्रवेशद्वारे अस्मिन् अत्र वंशे कुले वज्रसमुत्कीर्णे वज्रविद्धे मणौ रत्ने सूत्रस्य इव तन्तोः इव मे मम गतिः सञ्चारः अस्ति वर्तते।

**व्याख्यानम् -** एतावता महाकविः कालिदासः रघुवंशकाव्यस्य लेखने स्वस्य असामर्थ्यं प्रकटितवान्। किन्तु असामर्थ्ये सत्त्वे अपि स काव्यलेखने प्रवृत्तिकारणं वर्णयति यत् स एव रघुवंशस्य प्रथमः वर्णयिता इति नास्ति। पूर्वं वाल्मीक्यादयः महान्तः कवयः अपि रामायणादीन् ग्रन्थान् विरचितवन्तः। तत्र ते रघुवंशीयानां जीवनं सम्यक् वर्णितवन्तः। तस्मात् कवेः कार्यं सुकरम् एव वर्तते। एतदर्थसमर्थनाय कविः दृष्टान्तमपि दर्शयति। वज्रेण मणिवेधकसूचीविशेषेण वा मणौ छिद्राणि क्रियन्ते। छिन्ने रत्ने सूत्रस्य गतिः यथा सरला भवति तथा रघुवंशकाव्यरचनायां कवेः गतिः अपि बाधहीना वर्तते इति कवेः मतम्।

अस्मिन् श्लोके उपमालङ्कारः वर्तते।

**५) व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः।**

**आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः।।१३।।**

**प्रसङ्गनिर्देशः** - महाकविकालिदासविरचितस्य रघुवंशमहाकाव्यस्य प्रथमसर्गे विद्यते अयं श्लोकः। अस्मिन् श्लोके कविः दिलीपस्य देहं वर्णयति।

**सान्वयार्थाः** - व्यूढोरस्कः विपुलवक्षाः, वृषस्कन्धः वृषभांसः, शालप्रांशुः वृक्षोन्नतः, महाभुजः दीर्घबाहुः आत्मकर्मक्षमं स्वकार्यसमर्थं देहं शरीरम् आश्रितः प्राप्तः क्षात्रः क्षत्रियसम्बन्धी धर्मः गुणः इव स्थितः।

**व्याख्यानम् -** अस्मिन् श्लोके कविः दिलीपं वर्णयति। दिलीपस्य वक्षःस्थलं विशालाकारम् आसीत्। वृषस्य स्कन्धवत् बलयुक्तं तस्य स्कन्धद्वयम् आसीत्। वृक्षेषु शालवृक्षः अतीव उन्नतः भवति। दिलीपः अपि तथा उन्नतः आसीत्। तस्य भुजद्वयम् अपि दीर्घम् आसीत्। एवं तस्य शरीरं बहु बलिष्ठम् आसीत् इति ज्ञायते।

दिलीपम् अवलोक्य मन्यते स्म, यत् क्षात्रः धर्मः स्वकार्यं सम्पादयितुम् एकं समर्थं देहं समाश्रितवान्। अत्र स्वकार्यं नाम विपन्नजनानां त्राणादिकं भवति।

अस्मिन् श्लोके कविः क्षात्रः धर्मः आत्मकर्मक्षमं दिलीपदेहम् आश्रितवान् इति उत्प्रेक्षते। अतः अस्मिन् श्लोके उत्प्रेक्षालङ्कारः विद्यते।

**६) आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।**

**आगमैः सदृशारम्भ आरम्भसदृशोदयः॥१५॥**

**प्रसङ्गनिर्देशः** - महाकविकालिदासविरचितस्य रघुवंशमहाकाव्यस्य प्रथमसर्गे विद्यते अयं श्लोकः। अस्मिन् श्लोके कविः दिलीपं वर्णयति।

**सान्वयार्थाः** - सः आकारसदृशप्रज्ञः मुर्तितुल्यबुद्धिः प्रज्ञया बुद्ध्या सदृशागमः समानशास्त्रपरिश्रमः आगमैः शास्त्रैः सदृशारम्भः तुल्यकर्मा आरम्भसदृशोदयः कर्मसदृशफलसिद्धिश्च आसीत्।

**व्याख्यानम् -** दिलीपस्य शरीरं यथा सुन्दरं तथा प्रज्ञा अपि अपरिमेया आसीत्। एतादृशप्रज्ञाकारणात् स वेदादिशास्त्राणि सम्यक् अधीतवान् गृहीतवान् च। किन्तु केवलं शास्त्रपठनेन सर्वं न सिध्यति। अपि तु शास्त्रोक्तविधयः जीवने आचरणीया भवन्ति। अतः दिलीपः शास्त्राविहितानि कर्माणि स्वजीवने यथार्थम् आचरितवान्। यथा कर्माणि आचरितवान् तथा कर्मफलम् अपि लब्धवान्। एवं दिलीपः न केवलं शास्त्राणि अपठत्। अपि च शास्त्रं पठित्वा तानि शास्त्रोक्तवचनानि जीवने यथायथं प्रयुज्य तत्सदृशं फलम् अपि प्राप्तवान् इति अस्य श्लोकस्य आशयः।

**७) प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।**

**सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः॥१८॥**

**प्रसङ्गनिर्देशः** - महाकविकालिदासविरचितस्य रघुवंशमहाकाव्यस्य प्रथमसर्गे विद्यते अयं श्लोकः। अस्मिन् श्लोके कविः दिलीपस्य प्रजाकल्याणं वर्णयति।

**सान्वयार्थाः** - स दिलीपः प्रजानां जनानां भूत्यर्थं वृद्ध्यर्थं ताभ्यः प्रजाभ्यः बलिं करम् अग्रहीत् गृहीतवान्। हि तथा हि रविः सूर्यः सहस्रगुणं सहस्रधा उत्स्रष्टुं दातुं रसं जलम् आदत्ते गृह्णाति।

**व्याख्यानम् -** महाराजः दिलीपः राज्यवासिनां कल्याणाय तेषां सकाशात् करं गृहीतवान्। स करग्रहणं स्वभोगाय न कृतवान् अपि तु प्रजाकल्याणाय एव करं राजकोषे स संगृहीतवान्। सूर्यः सम्पूर्णं वर्षं व्याप्य

पृथिव्याः जलं गृह्णाति। ग्रीष्मकाले तदेव जलं सहस्रगुणवर्षणरूपेण प्रददाति। सूर्यः जलशोषणं स्वभोगाय न करोति। अधिकं जलं प्रत्यर्पयितुम् एव स पृथिव्याः जलं स्वीकरोति। एवं दिलीपः अपि प्रजाकल्याणाय करं गृहीतवान्।

**८) तस्य संवृतमन्त्रस्य गुढाकारेङ्गितस्य च।**

**फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव।।२०।।**

**प्रसङ्गनिर्देशः** - महाकविकालिदासविरचितस्य रघुवंशमहाकाव्यस्य प्रथमसर्गे विद्यते अयं श्लोकः। अस्मिन् श्लोके कविः दिलीपस्य कार्यकौशलं वर्णयति।

**सान्वयार्थाः** - संवृतमन्त्रस्य गुप्तविचारस्य गूढाकारेङ्गितस्य गुप्ते आकारेङ्गिते यस्य च तस्य दिलीपस्य प्रारम्भाः कर्माणि प्राक्तनाः प्राचीनाः संस्काराः इव पूर्वकर्मवासनाः इव फलानुमेयाः कार्येण अनुमातुं योग्याः आसन्।

**व्याख्यानम् -** मन्त्रणा गूढतया एव करणीया इति राजनीतेः नियमः वर्तते। यदि केनापि कारणेन मन्त्रणा प्रकाशिता भवति तर्हि समग्रस्य राज्यस्य हानिः सम्भवति। अतः दिलीपः अतीव गोपनतया मन्त्रिभिः सह मन्त्रणाम् अकरोत्। कार्यसिद्धिद्वारा एव मन्त्रणाया अनुमानं भवति स्म। यथा पूर्वजन्मकृतं पुण्यपापादिकं संस्काररूपेण तिष्ठति। जनानां प्रवृत्तिं दृष्ट्वा ते संस्काराः अनुमीयन्ते। एवं कार्यसिद्धिम् अवलोक्य दिलीपस्य मन्त्रणाः अनुमीयन्ते स्म। अत्र श्लोके उपमालङ्कारः विद्यते।

**९) ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।**

**गुणा गुणानुबन्धित्वात् तस्य सप्रसवा इव।।२२।।**

**प्रसङ्गनिर्देशः** - महाकविकालिदासविरचितस्य रघुवंशमहाकाव्यस्य प्रथमसर्गे विद्यते अयं श्लोकः। अस्मिन् श्लोके कविः दिलीपस्य गुणानां सहावस्थायित्वं वर्णयति।

**सान्वयार्थाः** - ज्ञाने सत्यपि परवृत्तान्तं ज्ञात्वा अपि मौनं मुनिभावः शक्तौ सामर्थ्ये क्षमा तितिक्षा त्यागे वितरणे श्लाघाविपर्ययः प्रशंसाभावः इत्थम् अनेन प्रकारेण तस्य दिलीपस्य गुणाः ज्ञानादयः गुणानुबन्धित्वात् विरुद्धगुणानां मौनादीनां सहचारात् सप्रसवाः इव सहोदराः इव अभूवन्।

**व्याख्यानम् -** अत्रापि दिलीपस्य लोकोत्तरत्वं वर्णयति कविः। दिलीपः ज्ञानी अपि मौनतया तिष्ठति स्म। स सामर्थ्यवान् अपि क्षमाशीलः आसीत्। सामर्थ्ये सति एव क्षमा प्रशंसनीया भवति। लोके जनाः त्यागं कृत्वा

समुद्घोषयन्ति। किन्तु दिलीपः दानादिकर्म कृत्वा अपि कीर्तनं न करोति स्म। एवं तस्य प्रशंसा अभीष्टा न आसीत्। वस्तुतः ज्ञानादयः गुणाः मौनादयः गुणाः च परस्परं विरुद्धाः वर्तन्ते। किन्तु दिलीपस्य एते सर्वे एव गुणाः आसन्। अतः दिलीपे इमे विरुद्धाः गुणाः सहोदराः इव आसन्। अत्र श्लोके उत्प्रेक्षालङ्कारः।

**१०) स वेलावप्रवलयां परिखीकृतसागराम्।**

**अनन्यशासनामुर्वीं शशासैकपुरीमिव॥३०॥**

**प्रसङ्गनिर्देशः** - महाकविकालिदासविरचितस्य रघुवंशमहाकाव्यस्य प्रथमसर्गे विद्यते अयं श्लोकः। अस्मिन् श्लोके कविः दिलीपस्य राज्यशासनं वर्णयति।

**सान्वयार्थाः** - स राजा दिलीपः वेलावप्रवलयां समुद्रतटरूपेण प्राकारेण वेष्टितां परिखीकृतसागराम् खेयीकृतः सागरः यया ताम् अनन्यशासनाम् अपरनृपशासनरहिताम् उर्वीं पृथिवीम् एकपुरीम् इव एकनगरीम् इव शशास शासितवान्।

**व्याख्यानम् -** दिलीपस्य राज्यस्य सागरतटः स्वतः एव प्राकारः सञ्जातः। एवमेव तेन परिखाः अपि न निर्मिताः। समुद्रः एव तस्य सुविशालस्य राज्यस्य परिखास्वरूपः आसीत्। एतेन एव अवगम्यते यद् दिलीपस्य राज्यम् समुद्रपर्यन्तम् आसीत्। अर्थात् सम्पूर्णा एव धरणी तस्य राज्ये अन्तर्भवति स्म। अतः दिलीपं विना अन्यस्य कस्य अपि नृपस्य शासनं पृथिव्यां नासीत् इति सुष्ठु अवगम्यते। यथा एकः नृपः एकं नगरं शास्ति तथा दिलीपः सम्पूर्णाम् अपि पृथ्वीम् एकनगरीम् इव शासितवान्।

**११) तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा।**

**पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा॥३१॥**

**प्रसङ्गनिर्देशः** - महाकविकालिदासविरचितस्य रघुवंशमहाकाव्यस्य प्रथमसर्गे विद्यते अयं श्लोकः। अस्मिन् श्लोके कविः दिलीपस्य पत्नीं वर्णयति।

**सान्वयार्थाः** - तस्य राज्ञः दिलीपस्य मगधवंशजा मगधकुले उत्पन्नाः दाक्षिण्यरूढेन औदार्यप्रसिद्धेन नाम्ना अभिधानेन अध्वरस्य यज्ञस्य दक्षिणा दक्षिणानामधेया इव सुदक्षिणा इति सुदक्षिणा इति नाम्ना प्रसिद्धा पत्नी भार्या आसीत्।

**व्याख्यानम् -** अध्वरस्य यज्ञस्य पत्न्याः नाम भवति दक्षिणा। यज्ञस्य अन्ते दक्षिणा प्रदीयते। ताम् अपि यज्ञस्य अङ्गत्वेन कल्पयन्ति जनाः। तेन एव यज्ञः सम्पूर्णः भवति इति अपि अस्ति प्रसिद्धिः। एवं यज्ञस्य सम्पूर्णत्वं साधयति दक्षिणा। मगधवंशे उत्पन्ना सुदक्षिणा दिलीपस्य पत्नी आसीत्। सा च दाक्षिण्यकारणात् अत्यन्तं प्रसिद्धा आसीत्। यथा दक्षिणा यज्ञस्य सम्पूर्णतां साधयति तथा सुदक्षिणा अपि दिलीपस्य सम्पूर्णतां साधितवती।